© 2017 IJSRSET | Volume 3, Issue 8, November-December-2017
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1272-1275

# आचार्यरेवाप्रसादद्विवेदिनां मते शब्दार्थशक्तिविमर्शः



वीरेन्द्र कुमार तिवारी (शोधच्छात्रः)
साहित्यविभागः,राष्ट्रियसंस्कृतसंस्थानम्,
भोपालपरिसरःभोपालम्

**शोधलेखसारः-** काव्यशास्त्रं हि कविकर्मरूपिणि शब्दार्थसन्दर्भे साहित्ये चमत्कारितां विस्तारयति। चमत्कृतिरेव प्राधान्यत्त्वात् शाब्दिकानामिव, नैयायिकानामिव, मीमांसका- नामिव वा शब्दस्य प्रमामत्वेन विचारणं नात्र भवति। आचार्यरेवाप्रसादद्विवेदिनां मते शब्दार्थयोः निर्णयः वेदान्तदर्शनदृष्टट्या गभीरं विस्तृतञ्च व्याख्यानं वर्तते । तेषां कथनं यत् शब्दः एवम् अर्थश्च द्वयमपि ज्ञानात्मकौ भवतः। शब्दत्त्वं केवलं वैखरीपर्यन्तं सीमितं भवति।मध्यमा,पश्यन्ती,परा च संवित्पर्यन्तं वर्तते। वैखरीदृष्ट्यापि शब्दः काव्यं न। यतोहि अनुवादे सति शब्दस्य ज्ञानमेव काव्यपर्यन्तं गच्छति न तु केवलं शब्दः। अतःशब्दः केवलं काव्यस्य उपाधिः भवति।शब्दपरिवर्तनेन केवलं सङ्गीतधर्म एव परिवर्तते न हि काव्यम्।

**मुख्यशब्दाः-** शब्दार्थः, काव्यम्, उपाधिः, शक्तिः, रेवारसादद्विवेदिः, शब्दशरीरः।

काव्यशास्त्रं हि कविकर्मरूपिणि शब्दार्थसन्दर्भे साहित्ये चमत्कारितां विस्तारयति। चमत्कृतिरेव प्राधान्यत्त्वात् शाब्दिकानामिव, नैयायिकानामिव,मीमांसकानामिव वा शब्दस्य प्रमामत्वेन विचारणं नात्र भवति। काव्यप्रकाशग्रन्थे शवब्दस्य स्वरूपविचारः न कृतः। शब्दार्थयोरूभयव्यासज्यवृत्तित्वेन काव्यं लक्षयित्वा ततोऽनु वाचकत्वलक्षकत्व - व्यञ्जकत्वभेदैश्शब्दाः विभक्ताः, न तत्र शब्दः कः इति सामान्यलक्षणमुक्तम्। एवमपि

**वाचकत्वलक्षकत्वव्यञ्जकत्वान्यस्बन्धेनार्थप्रतिपादकत्वं शब्दस्य लक्षणमित्युक्तं भवति।**

साहित्यपदपर्यायः काव्यशब्दो हि कवृ वर्णने, कुङ् शब्दे इति वा धातोर्निष्पन्नः कवेः विशिष्टामभिव्यक्तिं सूचयति।विशिष्टाभिव्यक्तिश्च समीप्सितार्थप्रत्यायनसमर्थेन शक्तिमता च शब्देन सिद्धयति। अत एव वर्णनानिपुणः कविः वाच्यलक्ष्यान्तररूपेण हृद्यमर्थं काव्ये निबद्धनाति हृद्यतममर्थं काव्यात्मानं व्यङ्ग्यं तु व्यञ्जनया प्रकाशते।

आचार्यरेवाप्रसादद्विवेदिनां मते शब्दार्थयोः निर्णयः वेदान्तदर्शनदृष्टट्या गभीरं विस्तृतञ्च व्याख्यानं वर्तते । तेषां कथनं यत् शब्दः एवम् अर्थश्च द्वयमपि ज्ञानात्मकौ भवतः। शब्दत्त्वं केवलं वैखरीपर्यन्तं सीमितं भवति। मध्यमा,पश्यन्ती,परा च संवित्पर्यन्तं वर्तते। वैखरीदृष्ट्यापि शब्दः काव्यं न।यतोहि अनुवादे सति शब्दस्य ज्ञानमेव काव्यपर्यन्तं गच्छति न तु केवलं शब्दः। अतः शब्दः केवलं काव्यस्य उपाधिः भवति। शब्दपरिवर्तनेन केवलं सङ्गीतधर्म एव परिवर्तते न हि काव्यम्। आनन्दकोषमुल्लासयितुं सालङ्कारो वाक्यार्थः भवति। तथा च काव्यालङ्कारकारिकायाः प्रथमकारिकायामुक्तम्-

**आनन्दकोषस्योल्लासे लोकोत्तरविभावना।**

**अलङ्कृतार्थसंवित्तिः कविता, सर्वमङ्गला॥**[1]

द्विवेदिमहोदयानां मतं यत् शब्दः एवं अर्थः तयोः परस्परं सम्बन्धश्चेति त्रयमपि काव्ये ज्ञानात्मना तिष्ठन्ति। अर्थज्ञानं शब्दज्ञानेन भवति। अतः सम्बन्धोऽपि त्रिष्वपि ज्ञानात्मकमेव भवति। यथा प्रतिबिम्बे शरीरस्य । एतदेवाधारीकृत्य द्विवेदिमहोदयाः काव्यलक्षणं काव्यं ज्ञानात्मकमपि वदन्ति। एवञ्च अवदन् यत् अलम्भावात्मकालङ्कारः काव्यशरीरे भवति अतः स एव काव्यस्य आत्मा भवितुं शक्नोति। न तु रसः। यतोहि आस्वादरूपेण रसः सहृदये भवति एवं तस्य अभिव्यञ्जकसामग्री काव्ये यः रसोक्तिनामकः अलङ्कारः स एवेति कथ्यते।

इत्थं प्रकारेण द्विवेदिमहोदयाः काव्यशरीरं ससूक्ष्मं व्याख्याय तत्स्वरूपस्य स्पष्टीकरणमकुर्वन्। अनेन एतस्मिन् विषये सतर्करूपेण विस्तृतचर्चां अकारि। अस्य संक्षिप्तसारः एव अत्र प्रस्तुतीकृतःन तु तेषां तर्काणामुदाहरणानाञ्च । द्विवेदिमहोदयाः एवं रूपेण काव्यविज्ञानस्य नूतनसरणिमाविष्कार्षुः। एवमवोचन् यत्–

**काव्यस्य ज्ञानरूपत्वे शब्दत्त्वं नोपपद्यते।**

**शब्दस्य ज्ञानतायां च शब्दतैव विनश्यति॥**[2]

अर्थात् काव्यं ज्ञानस्वरूपं वर्तते न तु शब्दस्वरूपम्। यदि शब्दः एव ज्ञानत्त्वेन स्वीक्रियते तदा शब्दत्वमेव नश्यति।

द्विवेदिमहोदयाः काव्ये शब्दशक्तिं नाङ्गीकुर्वन्ति। तेषां कथनं यत् काव्यभाषा एवं काव्यार्थः, एतयोः ज्ञानं यच्छक्तिः वर्तते तत् सर्वमपि संवित्स्वरूपं भवति तेभ्यः पृथक् न। एतत्विषये तेषां कथनं यत्–

**एवं काव्यस्य या भाषा,यश्चार्थो या च तद्धियोः।**

**शक्तिः, सर्वमिदं संवित्स्वरूपं न ततः पृथक्॥**

**शब्दश्चैकाऽभिधा शक्तिरिति वादी महामतिः।**

**वेदस्यापौरुषेयत्वात् भ्रान्तिश्वभ्रे नृगायते॥**

**शब्दसक्तिविचारो यः कवितादर्शने विदाम्।**

**सोऽयं रेवातटे मत्स्यवेधो धीवरताजुषाम्॥**[3]

सन्दर्भमेनं विवेचयन् द्विवेदिमहेदयाः स्वविरचित अभिधावृत्तिकाख्ये ग्रन्थे मतमेनं खण्डयन्ति।

**नमामः शब्दशक्त्याख्यां शाबरीं विषकन्यकाम्।**

**लग्नया श्रुतिमात्रेऽपि यया मूढा विपश्चितः॥**

**आनन्दवर्धनोपश्यत् तस्यास्त्रिविधरूपताम्।**

**भट्टश्रीमुकुलश्चैव दशवृत्तिवर्तिताम्॥**

**अपरे त्वनयोर्मोहं सत्यापयितुमिच्छवः।**

**कलहं कर्तुमारब्धाः पक्षमन्यतरं श्रिताः।।**

**तत्र श्रीमम्मटो हन्त गतस्तामेव दुर्गतिम्।**

**उच्चैस्त्रैविध्यपक्षेण स्वं श्रृणीते परश्वधम्।**

**ऐन्द्रजालिकलीलायां सत्यतां पश्यतामिमाम्।।**

**मोहलीलां बुधाःपश्यन्त्वत्र मद्भाष्यभूषिताम्।।**[4]

महोदयाः शब्दार्थरूपिणे काव्यशरीरे शक्तिरसादौ द्वयोः अभावं मन्यते। उक्तं यत्–

**रसस्य या च निष्पत्तिप्रक्रिया सापि सत्स्वया।**

**तद्विचारः पयोपीत्वा तत्पात्रे तक्रपातनम्।।**

**काव्ये स्फटिकपात्रे नु रसान् रश्मीन् यथा विधोः।**

**लेढुं व्यवसिताः क्षीरभ्रान्त्या वैडालिका बुधाः।।**

**क इमान् वारयेदद्य वर्षाणां शतकानि ये।**

**व्यतिचक्रुर्मरीचिस्थैर्जलैरात्माभिषेचने।।**

**एवं नास्त्येव शब्दस्य देहे शक्ती रसो यथा।**

**तद्विचारोऽपि यः सोऽत्र करकाऽऽसारतोपृथक्।।**[5]

अतः एतयोः द्वयोः विषये विचारः पात्रे विद्यमानं दुग्धं अपीत्वा तत्र तक्रस्थापनवद्भवति। काव्यं स्फटिकपात्रं वर्तते। तस्मिन् रसभूतानां चन्द्रकिरणानां पतनेन विद्वान्सः एनं रसं दुग्धं मत्वा मर्जारवत् लिहन्ति। एतान् इदानीं न कोऽपि अवरोद्धक्षः। एते अनादिकालात्मृगमरीचिजलेन स्नानं कुर्वन्तःआगताः। अतः शब्दशरीरे न शक्तिः। तिष्ठन्ति न वा रसाः।एतयोः यः विचारः सोऽपि उपलवृष्टिवत् भिन्नो वर्तते।

अतो विचार्यमाणे काव्यचिन्तकानां काव्यशास्त्रिणामपि शब्दार्थयोः परस्परं सम्बन्धरूपा अपि शब्दवृत्तयो विचारविषया भवन्ति। तस्माद्धि भामहेन शब्दाश्छन्दोऽभिधानार्थाः इत्यत्र काव्यालङ्कारकारिकायां गुणवृत्ति चिन्तनं समाहितमिति भट्टोद्भटकृतभामहविवरणेन ज्ञायते। दण्डिना गुणवृत्तिशब्दः प्रयुक्तः। वामनेन च ल्षणाविचारः स्पष्टीकृतः। भक्तिविषये तेनैव संसूचितम्। मुकुलेनाभिधायाः दशविधं वृत्तं व्याख्यायितम्। आनन्दव्रधनेन समुद्घाटितं ध्वनिप्रस्थानम्, अभिनवगुप्तेन व्यवस्थापितम्। प्राचीनेषु ध्वन्यालोकपर्यन्तेषु साहित्यशास्त्रग्रन्थेषु अभिधादिविभागपूर्वकं विवेचनमनुपलभ्यमानमपि साधारणरूपेण अलङ्कारविवचनान्तर्गतत्वेन वा सूक्ष्मतया कृतं शब्दशक्तिविवेचनं समुपलभ्यते। नवीनासु काव्यशास्त्रकृतिषु आचार्यरेवाप्रसादकृतिषु अभिधादिविभागपूर्वकं विवेचनं सुस्पष्टमुपलभ्यते।

© 2017 IJSRSET | Volume 3, Issue 8, November-December-2017
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1272-1275

सन्दर्भग्रन्थसूची-

1.काव्यालङ्कारकारिका-1

2.काव्यालङ्कारकारिका-4

3.काव्यालङ्कारकारिका-122/123/124

4.अभिधा.वृ.मा.-56/57/58/59/60

5.काव्यालङ्कारकारिका-172/173/174/175